ब्रह्मकृता श्रीकुंभेश्वरस्तुतिः

ब्रह्मोवाच

नमो नमःकारणकारणाय
श्रीमत्सुधाकुंभगविग्रहाय ।
कल्याणसान्द्राय गुणाकराय
श्रीकुंभलिङ्गायनमश्शिवाय ॥१ ॥

भीमाय भीमाधिहराय शंभवे
नागाय शान्ताय मनोहराय ।
महाजटाजूटधराय भूतये
श्रीकुंभलिङ्गायनमश्शिवाय ॥२ ॥

सर्वांगमाम्नायशरीरधारिणे

सोमार्कनेत्रायमहेश्वराय ।

यज्ञाय यज्ञेश्वरपूजिताय

श्रीकुंभलिङ्गायनमश्शिवाय ॥३ ॥

कात्यायनीकामितदायकाय

दुर्गार्धदेहाय कृतागमाय ।

कालाय कालेश्वरपूजिताय

श्रीकुंभलिङ्गायनमश्शिवाय ॥४ ॥

विभूतिदानेकशरीरधारिणे

कल्पायकल्पान्तकरायशंभवे ।

विश्वाय वैश्वानरलोचनाय

श्रीकुंभलिङ्गायनमश्शिवाय ॥५ ॥

मायाप्रपञ्चाय मनोहराय

मायाघटेशायमहाऽऽधिहारिणे ।

मायाप्रपञ्चैकनिदानमूर्तये

श्रीकुंभलिङ्गायनमश्शिवाय ॥६ ॥

भोगीन्द्रसंपूजितविग्रहाय

भोगीन्द्रभूषाय भवान्तकाय ।

श्रीभारतीशकरपल्लवपूजिताय

श्रीकुंभलिङ्गायनमश्शिवाय ॥७ ॥

ताम्राय चामीकरभूषिताय

श्रीसोमकोटीरविभूषिताय ।

समस्तसत्क्षेत्रतलावराय

श्रीकुंभलिङ्गायनमश्शिवाय ॥८ ॥

सृष्टिस्थितिध्वंसनकारणाय

श्रीसृष्टिबीजाङ्गमनोहराय ।

सच्छास्त्रवेदान्तकळेबराय

श्रीकुंभलिङ्गायनमश्शिवाय ॥९ ॥

षड्वर्गसंभेदनदीक्षिताय

षडाननादित्यफलप्रदाय ।

समस्तमन्त्रार्थनिदानरूपिणे

श्रीकुंभलिङ्गायनमश्शिवाय ॥१० ॥

कुंभोद्भवप्रमुखपूजितविग्रहाय
वीराय वीरान्तकराय मायिने ।
भक्तेष्टदाननिपुणायभवाब्धिपोत्रे
श्रीकुंभलिङ्गायनमश्शिवाय ॥११ ॥

मूलाय मूलागमपूजिताय
पाताळमूलाय निधीश्वराय ।
नित्याय सिद्धेश्वरपूजिताय
श्रीकुंभलिङ्गायनमश्शिवाय ॥१२ ॥

समस्तकल्याणवरप्रदाय

समस्तकल्याणनिदानमूर्तये ।

श्रीमङ्गळांबाऽर्चितपादपद्मिने

श्रीकुंभलिङ्गायनमश्शिवाय ॥१३ ॥

लग्नाधिपेशाय ग्रहार्चिताय

श्रीकामधेनुसुरसङ्घसुपूजिताय ।

पञ्चाननायपरमार्थनिदर्शकाय

श्रीकुंभलिङ्गायनमश्शिवाय ॥१४ ॥

तीर्थाधिनाथाय फलप्रदाय

फलस्वरूपाय फलाङ्गधारिणे।

श्रीमन्त्रपीठेश्वरिवल्लभाय

श्रीकुंभलिङ्गायनमश्शिवाय ॥१५॥

कारुण्यनिधये तुभ्यं

कल्याणगुणसिन्धवे।

शूलिने मालिने तुभ्यं

नमस्ते विश्वमूर्तये ॥१६॥

अघोराय नमस्तुभ्यं

वामदेवाय ते नमः ।

सद्योजाताय नीलाय

लोहिताक्षाय ते नमः ॥१७ ॥

चण्डखण्डाय शान्ताय

कालकालान्तकाय च ।

रुद्राय नीलकण्ठाय

नमो मृत्युञ्जयाय च ॥१८ ॥

शिपिविष्टाय कालाय

कालदण्डाय ते नमः ।

श्रीमते वेदनिधये

वेदवेद्याय ते नमः ॥१९ ॥

वैद्याय वसुनाथाय

वरिष्ठाय नमोनमः ।

शर्वाय शाखिने तुभ्यं

मदनाङ्गविभेदिने ॥२० ॥

चन्द्रचूडाय चण्डाय
नमस्ते खण्डितारये ।
हरिकेशाय देवाय
पुष्टानां पतये नमः ॥२१ ॥

पशूनां पतये तुभ्यं
वृषभाक्षाय ते नमः ।
वृषवाहाय विषवे
पुण्यकालाय ते नमः ।
कार्यकारणरूपाय
भेदभेद्याय ते नमः ॥२२ ॥

पुरतः पृष्ठतश्चैव

पार्श्वतस्ते नमोनमः ।

भूयो भूयो नमस्तुभ्यं

भूयो भूयो नमोनमः ॥२३॥

இந்த மின்னணுப் பதிப்பு, மேலக்காவேரி
ப்ரஹ்மீபூத பஞ்சாபகேச ப்ரஹ்மேந்த்ர ஸரஸ்வதி
ஸ்வாமிகளின் புனிதமான சேகரிப்பிலிருந்து
பெறப்பட்ட ஒரு போற்றுதலுக்குரிய நூலாகும்.

வேத மரபுகளைப் பாதுகாத்து அனைவரிடமும் கொண்டு சேர்க்கும் நோக்கில் அர்ப்பணிப்புள்ள சான்றோர்களின் கூட்டு முயற்சியால் இந்த நூல் தற்போது வெளிவருகிறது.

இந்நூலுக்கான மூலப் பிரதி, ஸ்வாமிகளின் சிஷ்யரான ஸ்ரீ வெங்கடேச ஸர்மா அவர்களால் வழங்கப்பட்டது.

காலத்தால் அழியாமல் இதனைப் பாதுகாக்கும் பொருட்டு, ஸ்ரீ ராஜாவேத காவ்ய பாடசாலை, க்ருஷ்ண யஜுர்வேத அத்யாபகர் **ஸ்ரீ ஸுந்தரராம ஸர்மா** அவர்களால் இது மிக கவனமாக ஸ்கேன் (Scan) செய்யப்பட்டு பி.டி.எஃப் (PDF) வடிவத்தில் மின்னாக்கம் செய்யப்பட்டது.

மேலும், தற்கால அறிஞர்களும் மாணவர்களும் எளிதில் பயிலும் வகையில், ஸ்ரீ ராஜா வேத காவ்ய பாடசாலை, க்ருஷ்ண யஜுர்வேத அத்யாபகர் **த்விவேதி ப்ரஹ்மஸ்ரீ ஸ்ரீ பாலாஜி** அவர்களால் இந்த நூல் ஸம்ஸ்க்ருதத்திற்கு (தேவநாகரி லிபிக்கு) எழுத்துப்பெயர்ப்பு (Transliteration) செய்யப்பட்டுள்ளது.

இவர்களது சீரிய தொண்டின் மூலமாக, இந்த விலைமதிப்பற்ற சாஸ்த்ரப் பொக்கிஷம் வருங்கால சந்ததியினரின் கல்விக்காகவும் பயன்பாட்டிற்காகவும் சிறப்பாகப் பாதுகாக்கப்பட்டுள்ளது.